AECSK2.1

Reg. No.

## II Semester B.B.A. Degree Examination, October - 2022
## SANSKRIT
### Mitrasampraapthi, Grammar, Translation and Comprehension
### (CBCS Scheme NEP Freshers 2020, 2021-22 Onwards)
### Paper - II

**Time : 2½ Hours** **Maximum Marks : 60**

*Instructions to Candidates*:- 1) Answer can be in Sanskrit/kannada/English.

2) Question No. I, V and VII should be answered in Sanskrit only.

St. Francis College LIBRARY Koramangala, Bengaluru-34

**I. समीचीनम् उत्तरं चित्वा लिखत।** **(10×1=10)**

1) पञ्चतन्त्रस्य कर्ता कः?

अ) भरतशर्मा आ) लक्ष्मणशर्मा इ) कृष्णशर्मा ई) विष्णुशर्मा

2) नारायणपण्डितस्य कृतिः का?

अ) बृहत्कथा आ) कथासरित्सागरः इ) हितोपदेशः ई) शुकसप्ततिः

3) हितोपदेशे कति तन्त्राणि सन्ति?

अ) पञ्च आ) चत्वारि इ) त्रीणि ई) दश

4) लघुपतनक इति कस्य नाम?

अ) वायसस्य आ) कपोतस्य इ) मूषकस्य ई) सिंहस्य

5) लुब्धकः कः इव आसीत्?

अ) यमकिङ्करः आ) ब्रह्मा इ) विष्णुः ई) किरातः

6) सुतप्तं पानीयं पावकं किं करोति?

अ) ज्वलयति आ) शमयति इ) वर्धते ई) विकासयति

[P.T.O.

Scanned with CamScanner

7) कूर्मस्य नाम किम्?

अ) चित्रग्रीव: आ) मेघवर्ण: इ) मन्थरक: ई) लघुपतनक:

8) स्वदेशे क: पूज्यते?

अ) विद्वान् आ) मूर्ख: इ) वणिक् ई) राजा

9) ताम्रचूडकथां क: वदति?

अ) हिरण्यक: आ) चित्रग्रीव: इ) लघुपतनक: ई) मन्थरक:

10) का न कर्तव्या?

अ) स्नेह: आ) अतितृष्णा इ) सेवा ई) परोपकार:

**II. द्वयो: प्रबन्धरूपेण उत्तरयत।** **(2×8=16)**

ಎರಡಕ್ಕೆ ಪ್ರಬಂಧರೂಪದಲ್ಲಿ ಉತ್ತರಿಸಿ.

**Write an essay on any two of the following.**

1) प्रसिद्ध संस्कृतकथाग्रन्था:।

ಪ್ರಸಿದ್ಧ ಸಂಸ್ಕೃತಕಥಾಗ್ರಂಥಗಳು.

Famous Sanskrit tales and fables.

2) सपरिवारो चित्रग्रीव: कथं बन्धनात् विमुक्त: इति विस्तारेण लिखत।

ಪರಿವಾರಸಹಿತನಾದ ಚಿತ್ರಗ್ರೀವನು ಬಂಧನದಿಂದ ಹೇಗೆ ವಿಮುಕ್ತಗೊಂಡನು ಎಂಬುದನ್ನು ವಿಸ್ತಾರವಾಗಿ ಬರೆಯಿರಿ.

Write elaborately how did chitragreeva along with his subjects was released from the net.

3) तिलचूर्णकथां विस्तारेण लिखत।

ತಿಲಚೂರ್ಣ ಕಥೆಯನ್ನು ವಿಸ್ತಾರವಾಗಿ ಬರೆಯಿರಿ.

Elaborate the story of "Tilachurna".

**III. गद्यभागस्य अनुवादं कन्नड वा आंग्लभाषया कृत्वा लिखत।** **(1×6=6)**

ಗದ್ಯಭಾಗವನ್ನು ಕನ್ನಡಕ್ಕೆ ಅನುವಾದ ಮಾಡಿ ಬರೆಯಿರಿ.

**Translate and write the prose passage in to English.**

अथ ये पक्षिणस्तत्र स्थितास्ते लघुपतनकवाक्यार्गलया निवारितास्तान् तण्डुलान् हालाहलाङ्कुरानिव वीक्षमाणा निभृता: तस्थु:। अत्रान्तरे चित्रग्रीवो नाम कपोतराज: सहस्रपरिवार: प्राणयात्रार्थं परिभ्रमन् तान् तण्डुलान् दूरतोऽपि पश्यन् लघुपतनकेन निवार्यमाणोऽपि जिह्वालौल्यात् भक्षणार्थमपतत् सपरिवारो निबद्धश्च। अत्रान्तरे लुब्धकस्तान् बद्धान् विज्ञाय प्रहृष्टमना: प्रोद्यतयष्टि: तद्वधार्थं प्रधावित:। चित्रग्रीवोऽपि आत्मानं सपरिवारं बद्धं मत्वा लुब्धकमायान्तं दृष्ट्वा तान् कपोतान् ऊचे –"अहो! न भेतव्यम्।"

Scanned with CamScanner

(अथवा/ಅಥವಾ/OR)

वायस आह –"भो:! द्विविधस्य वैरस्य लक्षणं श्रोतुमिच्छामि। तत् कथ्यताम्।" हिरण्यक आह – "भो:! कारणेन निर्वृत्तं कृत्रिमम्।" तत्तदर्होपकारकरणाद्गच्छति। स्वाभाविकं पुन: कथमपि न गच्छति। तद्यथा नकुलसर्पाणां, शष्पभुङ्नखायुधानां, जलवह्न्यो:, देवदैत्यानां, सारमेयमार्जाराणां, ईश्वरदरिद्राणां सपत्नीनां, सिंहगजानां, लुब्धकहरिणानां, श्रोत्रियभ्रष्टक्रियाणां, मूर्खपाण्डितानां, पतिव्रताकुलटानां, सज्जनदुर्जनानाम्। न कश्चित् केनापि व्यापादित: तथापि प्राणान् सन्तापयन्ति।"

IV. त्रयाणां वाक्यानां ससन्दर्भं विवृणुत। (3×3=9)

ಯಾವುದಾದರೂ ಮೂರು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

**Explain with reference to context any three sentences.**

1) दुरात्मा लुब्धको जालतण्डुलहस्त: समश्येति।
2) भो:। न युक्तमुक्तं भवता।
3) त्वम् भोक्ता। अहं ते भोज्यभूत:।
4) विरक्ति: सञ्जाता मे सांप्रतम्।
5) त्वदीयं मठम् त्यक्त्वा अन्यत्र मठं यास्यामि।
6) तिलान् लञ्चित्वा तिलचूर्णेन भोजयिष्यामि।

V. संस्कृते उत्तरयत।

अ) सन्धिं विभज्य सन्धिनाम लिखत। (पञ्चानाम्) (5×1=5)

1) इत्येवं
2) ममापि
3) भूयोऽपि
4) नरकोपार्जनं
5) द्वावपि
6) केनापि
7) भविष्यतीति
8) सदैव

आ) अधोदत्त पदान् उपयुज्य वाक्यान् रचयत। (चतुर्णाम्) (4×1=4)

1) परित:।
2) भयम्।
3) नम:
4) दूरे
5) सह
6) अलम्
7) विना
8) प्रति

[P.T.O.

Scanned with CamScanner

VI. कन्नड वा आंग्लया भाषान्तरं कृत्वा लिखत। (1×5=5)

ಕನ್ನಡಕ್ಕೆ ಭಾಷಾಂತರಿಸಿ.

Translate in to English.

व्यवहारस्य प्रमुख साधनं भाषा। भाषया ज्ञानं वर्धते। विश्वे अस्मिन् अनेकाः भाषाः सन्ति। तासु संस्कृतभाषा अन्यतमा। संस्कृतभाषायाः साहित्यं विपुलं वर्तते। न केवलं भारतदेशीयाः विदेशीयाः अपि संस्कृतम् अभ्यसन्ति। संस्कृतस्य देववाणी, गीर्वाणवाणी, भारती इत्यादीनि नामानि सन्ति।

VII. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (5×1=5)

कल्याणनगरे कश्चित् कृष्णकुमारो नाम आसीत्। क्लेशं विना विद्यां प्राप्तुमिच्छन् सः तपस्तप्तुं गङ्गातटं जगाम। तस्य मूर्खतां बोधयितुमिन्द्रः वेषान्तरेण तत्रागच्छत्। कृष्णकुमारस्य समीपे स्थित्वा गङ्गातटस्य सिकताः कणशः गृहीत्वा वारिणी क्षेप्तुमारभत। कृष्णकुमारः तमपृच्छत् – 'भोः पुरूष किमिदं करोषि?' इति। इन्द्रः अवदत् – 'सिकतायाः गङ्गायाः सेतुं बध्नामि' इति। अयं विहस्य अवदत् – 'अहो मूर्खता। सिकताभिः किं गङ्गायाः सेतुर्भवति?' इति। तदा इन्द्रः प्रत्युवाच – 'एवं किम्? तर्हि पठनक्लेशं विना केवलं तपसा विद्यां प्राप्तं शक्यते किम्? यदि तत् भवति तदा इदमपि भवति' इति। तदा कृष्णकुमारः तपः त्यक्त्वा पठनक्लेशार्थम् अगच्छत्।

प्रश्नाः–

1) कल्याणनगरे कः आसीत्?

2) कृष्णकुमारः कुतः गङ्गातटं जगाम?

3) इन्द्रः किं कर्तुम् आरभत?

4) कृष्णकुमारः विहस्य इन्द्रं किमवदत्?

5) केन विना विद्या न प्राप्यते?

Scanned with CamScanner